# .. Shri Mukambika Ashtakam ..

## ॥ श्रीमूकाम्बिकाष्टकम् ॥

### Document Information

Text title : Mukambika Ashtakam

File name : mUkAmbikA8.itx

Category : aShTaka

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Shree, NA

Latest update : July 31, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ श्रीमूकाम्बिकाष्टकम् ॥

नमस्ते जगद्धात्रि सद्ब्रह्मरूपे
नमस्ते हरोपेन्द्रधात्रादिवन्दे ।
नमस्ते प्रपन्नेष्टदानैकदक्षे
नमस्ते महालक्ष्मि कोलापुरेशि ॥ १॥

विधिः कृत्तिवासा हरिर्विश्वमेतत्-
सृजत्यत्ति पातीति यत्तत्प्रसिद्धं
कृपालोकनादेव ते शक्तिरूपे
नमस्ते महालक्ष्मि कोलापुरेशि ॥ २॥

त्वया मायया व्याप्तमेतत्समक्षं var समस्तं
धृतं लीलया देवि कुक्षौ हि विश्वम् ।
स्थितां बुद्धिरूपेण सर्वत्र जन्तौ
नमस्ते महालक्ष्मि कोलापुरेशि ॥ ३॥

यया भक्तवर्गा हि लक्ष्यन्त एते
त्वयाऽत्र प्रकामं कृपापूर्णदृष्ट्या ।
अतो गीयसे देवि लक्ष्मीरिति त्वं
नमस्ते महालक्ष्मि कोलापुरेशि ॥ ४॥

पुनर्वाक्पटुत्वादिहीना हि मूका
नरास्तैर्निकामं खलु प्रार्थ्यसे यत्
निजेष्टाप्तये तेन मूकाम्बिका त्वं
नमस्ते महालक्ष्मि कोलापुरेशि ॥ ५॥

यदद्वैतरूपात्परब्रह्मणस्त्वं
समुत्था पुनर्विश्वलीलोद्यमस्था ।
तदाहुर्जनास्त्वां च गौरीं कुमारीं
नमस्ते महालक्ष्मि कोलापुरेशि ॥ ६॥

हरेशादि देहोत्थतेजोमयप्र-
स्फुरच्चक्रराजाख्यलिङ्गस्वरूपे ।
महायोगिकोलर्षिहृत्पद्मगेहे
नमस्ते महालक्ष्मि कोलापुरेशि ॥ ७॥

नमः शङ्खचक्राभयाभीष्टहस्ते
नमः त्र्यम्बके गौरि पद्मासनस्थे । नमस्तेऽम्बिके
नमः स्वर्णवर्णे प्रसन्ने शरण्ये
नमस्ते महालक्ष्मि कोलापुरेशि ॥ ८॥

इदं स्तोत्ररत्नं कृतं सर्वदेवै-
र्हृदि त्वां समाधाय लक्ष्म्यष्टकं यः ।
पठेन्नित्यमेष व्रजत्याशु लक्ष्मीं
सुविद्यां च सत्यं भवत्याः प्रसादात् ॥ ९ ॥ सविद्यां

P. R. Ramamurthy, Shree

.. Shri Mukambika Ashtakam ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*